श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ चतुर्दशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ चतुर्दशः सर्गः ॥

अथैकदा रोधसि पश्चिमोदधेः
    अदभ्रसत्राजितभक्तियन्त्रितः।
त्रयीमयश्चन्द्रसमीकृतद्युतिः
    प्रसेदिवान् प्रादुरभूद्दिवाकरः॥ १४.१ ॥

अनल्पतेजोनिधिमप्रमाद्यतां
    प्रसूतिमिष्टस्य धनस्य भूयसः।
स्वकण्ठलग्नं द्युमणिः स्यमन्तकं
    महामणिं भूमिभृते वरं ददौ॥ १४.२ ॥

तमुग्रसेनार्थमियेष कंसजित्
    न वार्यते राजनि रत्नहारिता।
प्रतीत्य सत्राजित एतदप्रियं
    क्वचिन्निचिक्षेप गुणाधिके मणिम्॥ १४.३ ॥

यदेकमेकेन च लब्धमेकतो
    रसेन रत्नामिषमर्थकाङ्क्षिणा।
बभूव तद्बन्धुविरोधमादधत्
    क्रमाद्बहूनां विनिपातकारणम्॥ १४.४ ॥

स्यमन्तकोदन्तविशेषसंभवां
    मृषाभिशस्तिं शमयन्नथात्मनः।
प्रसेनविध्वंसकसिंहघातिनो
    बिलं ययौ जाम्बवतो बलानुजः॥ १४.५ ॥

स्तनन्धयोपान्तनिबद्धगीतया
    ददर्श धात्र्या विधृतं करेण सः।

धनाष्टभारप्रभवं दिनेदिने
    मणीश्वरं दर्शितकौस्तुभश्रियम्॥ १४.६ ॥

जिघृक्षया दत्तदृशं च तत्र तं
    जरानिरुद्धोऽपि जवेन जाम्बवान्।
अरोधनीयं विबुधैरपि स्वयं
    रुरोध नैसर्गिकसत्त्वरोषितः॥ १४.७ ॥

मलिम्लुचं कञ्चिदिवागतं हरिं
    वनेचरः प्रेक्ष्य तदर्हविक्रियः।
अहेतिहस्तं स्वयमप्यनायुधः
    प्रसह्य तं बाधयितुं प्रचक्रमे॥ १४.८ ॥

अनन्यतन्त्रस्य पितुः पितामहः
    सुतस्य चाऽऽरब्धमवेक्ष्य संयुगम्।
समीहितोदर्कमिदं द्वयोरिति
    प्रबुध्यमानो न निरोधमादधे॥ १४.९ ॥

मिथस्तयोरस्तदयं विमथ्नतोः
    अनायुधं युद्धमपेतकैतवम्।
अकल्पित प्राश्निकमन्ववैक्षत
    स्वयं चतुर्भिर्दशभिश्च साक्षिभिः॥ १४.१० ॥

अरिष्टचाणूरमुखेष्वलक्षितं
    प्रदर्शयन् ऋक्षपतेः पराक्रमम्।
चिरं ददौ युद्धमचिन्त्यचेष्टितो
    मनस्विनस्तस्य मधुप्रभञ्जनः॥ १४.११ ॥

प्रकीर्यमाणा निजमुष्टिमुद्गर-
    क्षताकृतेर्जाम्बवतः क्षतोद्भवैः।
रराज रामावरजस्य सा तनुः
    सशक्रकोपा वसुधेव शाद्वला॥ १४.१२ ॥

स ऋक्षराजः क्षतजैर्जयश्रियः
कुचार्पितैः कुङ्कुमकर्दमैरिव।
परिष्कृताङ्गः प्रचितोन्नताकृतिः
सगैरिकक्ष्माधरसंपदं दधौ॥ १४.१३ ॥

अशेषयज्ञाग्रहरं समागतं
जिगीषयाऽनुव्रतया स दीक्षितः।
अतोषयत् संयुगसप्ततन्तुना
विभाव्य ऋत्विग्विधिना भुजादिभिः॥ १४.१४ ॥

तलप्रहारैरथ मुष्टिपातनैः
पदाभिघातैर्भुजयन्त्रपीडनैः।
मिथः प्रतिक्षेपपुनर्गृहीतिभिः
नियुद्धचर्यानिपुणौ निजघ्नतुः॥ १४.१५ ॥

कृतप्रतीकारविशेषतोषितौ
परस्परच्छिद्रनिवेशितेक्षणौ।
दिशागजेन्द्राविव दर्पदुर्मदौ
दिनानि तौ निन्यतुरेकविंशतिम्॥ १४.१६ ॥

अहीयत प्रत्यहमृक्षभूपतिः
स्वलीलया कंसरिपुः समैधत।
तमःप्रकाशाविव तौ दिनागमे
बभूवतुः संयति पूर्वपश्चिमौ॥ १४.१७ ॥

स तेजसा यादवतिग्मतेजसः
समिध्यमानेन निवारितोन्नतिः।
शरन्नदीपूर इव स्फुटाशयः
शनैः शनैः शान्तिमवाप जाम्बवान्॥ १४.१८ ॥

वलीभिरापादतलं तरङ्गितः
सिरालुदेहः पलितैः सितासितः।

चिरप्रवृत्ताहवसम्भृतश्रमो
न चेतसा ऋक्षपतिः प्रचुक्षुभे॥ १४.१९ ॥

स्वविक्रमादप्रतिमात् सुरद्विषां
भयानकादानकदुन्दुभेः सुतः।
अबिभ्यतं प्रेक्ष्य तमृक्षपुङ्गवं
महासुरं केवलमस्मरन्मधुम्॥ १४.२० ॥

युगान्तदम्भोलिनिपातभीषणैः
निहन्यमानं निजमुष्टिमुद्गरैः।
स्वनाभिपद्मोद्भवजृम्भिकासुतं
बलानुजन्मा युधि बह्वमन्यत॥ १४.२१ ॥

दशाननायोधनकेलिकिङ्करं
परामृशन्नृक्षपतिं परः पुमान्।
बलीयसस्तस्य वहूपकारवित्
बभञ्ज दर्पं भुजयन्त्रलीलया॥ १४.२२ ॥

तमादितो मानुषमात्रमागतं
सदृक्षमृक्षाधिपतिस्ततः परम्।
अथाधिकं सामिनिरुद्धपौरुषः
क्रमादमीमांस्यममंस्त कर्मभिः॥ १४.२३ ॥

उवाच चैनं विधिवक्त्रसम्भवः
स्वविक्रमप्रीतमनुक्रमाद्विदन्।
सगद्गदं सन्नमितेन मौलिना
नखत्विषा पुष्पितमञ्जलिं वहन्॥ १४.२४ ॥

अहो महत् सत्त्वमहो पराक्रमः
त्वमीश्वरो नूनमहो निरीश्वरः।
अतीतदेवासुरनागनैर्ऋतः
पतिः पतीनां प्रतिभाति मे भवान्॥ १४.२५ ॥

अनेकमन्वन्तरदर्शिना मया
न खल्वरामो ददृशे भवादृशः।
निजौजसा नैर्ऋतयूधघातिनं
नियोधयन् यन्निभृतं प्रवर्तसे॥ १४.२६ ॥

गुणैरपि प्रत्यवमृश्यते भवान्
दशाननाद्यैर्युधि दृष्टवैभवः।
श्रुतं मया सिद्धजनादिह स्वयं
गुहाशयः प्राप्स्यति ते गुहामिति॥ १४.२७ ॥

वनं तदेतन्महितं तपोवनं
गिरिं च वेद्मि त्रिदिवेश्वरालयम्।
पचेलिमं किन्नु तपो बिलस्य मे
प्रसाधितं यत्तव पादपांसुभिः॥ १४.२८ ॥

स्वनाभितः सप्तमजन्मभागिनो
विजृम्भमाणस्य विधेर्यदृच्छया।
त्वमेव मां वेदमधुव्रताश्रितात्
मुखाब्जतः स्वानुचरं व्यजीजनः॥ १४.२९ ॥

त्रिभिः क्रमैर्दीव्यति दिव्यवामने
स्वमायया मोहितदानवे त्वयि।
जगन्ति विश्वानि मितानि विष्णुने
त्यघोषयं द्रागिव जैत्रघोषणाम्॥ १४.३० ॥

जिघांसिते देव दशानने त्वया
हतारिसङ्घैर्हरियूथपैर्वृतः।
अवर्तयत् सूर्यसुतस्य सन्निधा-
वयं जनः किङ्करवृत्तिमाहवे॥ १४.३१ ॥

गतेषु सुग्रीवमुखेषु तावकं
पदं तदप्राप्यमहं त्विह स्थितः।

त्वदीक्षणात् प्राप्तफलोऽस्मि साम्प्रतं
जरन् पुनर्यौवनमाप्तवानिव॥ १४.३२ ॥

न तादृशाः सम्प्रति सन्तिभूतले
ऋते भवन्तं प्रतिसन्धिभावनैः।
हनूमतैकेन विभीषणेन वा
मयाऽपि वा सोऽयमिति त्वमूह्यसे॥ १४.३३ ॥

रसावहैरेकधियां रसायनैः
शुभैः श्रुतिश्रेणिशिरोविभूषणैः।
अपेतभारामतिदेवमानुषैः
विहारभेदैरवनीं विधास्यसि॥ १४.३४ ॥

विशुद्धमिश्रैश्चतुरश्रवृत्तकैः
अगाधतुङ्गैः प्रमितामितक्रमैः।
अनन्यभावाननुकम्पते भवान्
अचिन्त्यचिन्त्यैरवतारनाटकैः॥ १४.३५ ॥

न वर्धसे कर्मभिरीश साधुभिः
न हीयसे च त्वमसाधुभिः कृतैः।
जगत्परित्राणपरेण केवलं
विधिर्निषेधश्च न लङ्घ्यते त्वया॥ १४.३६ ॥

गुणोदधिस्त्वं गुणकर्बुरात्मना
तिरस्करिण्या पिहितात्मदृष्टिभिः।
न दृश्यसे देव सदा सहैव सन्
दिदृक्षमाणैरपि देवदानवैः॥ १४.३७ ॥

जगत्तवान्तर्बहिरप्यमुष्य च
त्वमेवमेवंविधचित्रवैभवः।
समाधिदृष्ट्या मुनिभिः समीक्ष्यसे
सनातनो नूतनभूमिकाश्रितः॥ १४.३८ ॥

तवैव सङ्कल्पकलांशतः क्वचित्
समर्थवादाः परमेष्टिनामपि।
त्वयि प्रतिद्वन्द्विनि कस्य किं बलं
क एव जेता न भवेत्त्वयेक्षितः॥ १४.३९ ॥

असह्यमेतन्मधुकैटभादिभिः
स्वतल्पसारोल्बणबाहुना त्वया।
निपीडनं यन्निबिडं विषह्यते
मयाऽल्पसत्त्वेन तवैव तद्बलम्॥ १४.४० ॥

त्वया जितोऽहं क इवाजितः परो
न रुध्यसे नाथ मया न किं परैः।
दयालुनाऽपास्यत दर्प एव मे
भुजाहवे च व्युदपादि भूष्णुता॥ १४.४१ ॥

न नीतिवर्तन्यतिलङ्घिता मया
न च त्वदादेशविपर्यये स्थितः।
तथाऽपि सर्वाधिकसत्क्रियोचिते
विरुद्धचेष्टा विदधे विमोहितः॥ १४.४२ ॥

जगत्पते जाम्बवतीमिहार्हणां
गृहाण पत्नीं गृहमागतः स्वयम्।
मणिं च दिव्यं द्युमणेः स्यमन्तकं
युतं धनैर्यौतकमर्पयामि ते॥ १४.४३ ॥

ममाऽऽत्मजाऽपि श्रियमेवमप्सरः
प्रसूतिरेषा वहती श्रिया समाम्।
त्वदर्हशीलादिगुणप्रसाधिता
स्वयं वृणीतेऽद्य भवन्तमेकधीः॥ १४.४४ ॥

त्वदागमादृक्षबिलं परं पदं
त्वदीक्षणात् सूरिगणा इमे वयम्।

त्वदाश्रयात् सिन्धुसुतेव मत्सुता
त्वया धृतोऽसौ मणिरस्तु कौस्तुभः॥ १४.४५ ॥

त्वदाहितस्वातिशयैः स्वयोगतः
परत्र साध्योऽतिशयः स्थिरत्रसैः।
अनन्यसाध्यातिशयस्य तस्य ते
स्वशेषताऽसौ न विघातमर्हति॥ १४.४६ ॥

स्वयोगभूम्ना चुलकीकृताखिलैः
मुकुन्द देवैरपि किं न मुह्यते।
विवेकवैराग्यविदेशवर्तिना
वनौकसा मांसदृशा मया न किम्॥ १४.४७ ॥

अभार्गवो नापनयेत न क्वचित्
न वक्त्यसाधून्यबृहस्पतिर्न च।
अवासवो न च्यवते न चाहवा-
दते च ते तद्वदहं तु किं पुनः॥ १४.४८ ॥

भवार्णवे कर्मविपाकवात्यया
भवद्भिरावर्तगणैः परिभ्रमन्।
कृतोपरोधः कृपया त्वदीयया
भवत्पदं कूलमिव प्रपद्यते॥ १४.४९ ॥

अविन्दतस्त्वाममितामृतोदधिं
विगाढतृष्णाविवशान्तरात्मनः।
विगाहनीयाः प्रतिभान्ति वीचिका
मरीचिकानामिव भोगसम्पदाम्॥ १४.५० ॥

गुणोदधिं यः प्रमितप्रमाणया
गिरा त्वदीयं परिमातुमिच्छति।
स पातुमीहेत समग्रचापलः
सरोजनालेन पयःपयोनिधिम्॥ १४.५१ ॥

अकर्मतन्त्रस्य जगन्ति कर्मभिः
निबध्यमानानि विमुञ्चतस्तव।
अलीकलेशैरनुपप्लुता स्तुतिः
तथाऽप्यकल्प्येयमयावदुक्तितः॥ १४.५२ ॥

अजानत त्वन्महिमानमद्भुतं
विमोहितं देव तवैव मायया।
कृतापराधं कृपया वशीकृतः
क्षमस्व मामित्यपतत् क्षमातले॥ १४.५३ ॥

विलूनमूलद्रुमसन्निभं स तं
विलक्षमुत्थाप्य विहारयादवः।
प्रियाङ्गरागव्यतिहारगन्धिना
भुजान्तरेणोपजुगूह सादरम्॥ १४.५४ ॥

स कन्यकारत्नमचिन्त्यवैभवं
वदान्यरत्नं च समं समर्पयन्।
सरस्वतीवल्लभवक्त्रसम्भवो
महामनाः पूर्णमनोरथोऽभवत्॥ १४.५५ ॥

वनौकसां पत्युरहीन्द्रशोभिना
विमथ्यमानादचलेन बाहुना।
ननन्द लब्ध्वा हृदयङ्गमां प्रियां
मणिं च दिव्यां मधुकैटभान्तकः॥ १४.५६ ॥

स्तनापदेशस्तबकावभासिनी
विलासभेदैरभिनीतपल्लवा।
रमापतौ गारुडभूधरद्युतौ
रसाधिका रत्नलतेव सा बभौ॥ १४.५७ ॥

सविस्मया पूर्वमथ प्रमोदिनी
ततो मदारम्भमिवाभिजग्मुषी।

तदन्यसंस्कारनिरोधतः क्रमात्
    तदीक्षणे तन्मयतामवाप सा॥ १४.५८ ॥

स पर्यणैषीत् त्रिदशैरुपस्थितो
    विधिर्यदाज्ञा विधिजन्मनः सुताम्।
बिले तदीये विबुधालयोपमे
    विकल्प्यमानाकृतिमप्सरोगणैः॥ १४.५९ ॥

अवाप्य जामातरमादिपूरुषं
    जगत्प्रतीक्ष्यत्वमवाप जाम्बवान्।
विदर्भराजेन विदेहभूभृता
    समक्रमं दुग्धपयोधिना च सः॥ १४.६० ॥

मनुष्यभावाभिनयव्यवस्थितां
    कुशीलवार्हां कुहनां वहन् प्रभुः।
पुनस्तमृक्षेन्द्रपदानुभूतये
    परं च भोक्तुं पदमन्वमन्यत॥ १४.६१ ॥

प्रहृष्यता जाम्बवता निवेदितां
    प्रवालजाम्बूनदरत्नसंहतिम्।
प्लवङ्गभल्लूकगणैरनुप्लवैः
    अविप्लवां द्वारवतीमजीगमत्॥ १४.६२ ॥

ततस्तमामन्त्र्य चतुर्मुखात्मजं
    प्रतिप्रयातः स्वपुरीं प्रियासखः।
स्यमन्तकं संसदि दानवान्तकः
    स्वतोऽनघः स्वामिवशे न्यवीविशत्॥ १४.६३ ॥

जगत्पतिं जाम्बवतीसखं तदा
    नियुद्धचिह्नैः परिकर्मिताकृतिम्।
निरीक्ष्य तं द्वारवतीनिवासिनो
    ननन्दुरानन्दजलाविलेक्षणाः॥ १४.६४ ॥

अपेतसम्मोहमिवात्मवेदिनं
दिवाकरं राहुमुखादिवोद्गतम्।
अमंस्त नागेन्द्रमिवास्तशृङ्खलं
प्रशान्तवाच्यं प्रकृतिर्यदूद्वहम्॥ १४.६५॥

जिताहितो जाम्बवतीनिषेवितः
स तत्र सत्राजितसात्कृते मणौ।
स्वचौर्यदुर्वादममार्जयत् स्वयं
न विद्यते यस्य न किञ्चिदण्वपि॥ १४.६६॥

स्यमन्तकस्य द्युमणेरिव त्विषा
निमेषमापुः कुमुदाकरा इव।
ह्रिया च मिथ्यापरिवादिनस्तदा
परे च पद्मा इव तद्विपर्ययम्॥ १४.६७॥

स्वगोचरानेवमगोचरो गिरां
बलानुजो बालधियामपाहरात्।
रहः सु रथ्यासु च लब्धसम्भवान्
अवर्णवादाननघो गुणार्णवः॥ १४.६८॥

अकीर्तिरारोप्यत कीर्तिरागता
यदप्रियं प्रोचुरिदं प्रियाप्तये।
न कर्मतन्त्रेषु मतेरमोहता
न च स्वतन्त्रे स्युरनिष्टहेतवः॥ १४.६९॥

प्रशान्तखेदः प्रतिलभ्य सन्मणिं
जगद्विनेतुर्वसुदेवजन्मनः।
ददौ धरित्रीमिव सद्गुणाधिकां
स सत्यभामां तनयां नयाम्बुधिः॥ १४.७०॥

यथा गिरीशो गिरिराजसम्भवां
पुलोमकन्यां च दिवौकसां पतिः।

स्वयं च दुग्धोदसुतां सुधासखीं
तथा स रेमे सदृशीमवाप्य ताम्॥ १४.७१ ॥

अनुव्रता कामकलास्वधीतिनी
विचित्रशस्त्रास्त्रविहारवेदिनी।
बहुप्रियस्यापि हरेरतीव सा
बभूव देवी बहुमानगोचरा॥ १४.७२ ॥

यथा न खेदाय गतः क्षणो भवेत्
यथा च तन्वीत न भीतिमायतिः।
अनन्तनिष्कम्पगुणामनुक्षणं
प्रियः प्रियां प्रीतिमलम्भयत्तथा॥ १४.७३ ॥

स वल्लभाभिस्तिसृभिः प्रकाशयन्
परत्वमाद्यं प्रतिपन्नषड्गुणः।
नयो महीयानिव शक्तिभिः समं
समेतसिद्धिः प्रचिकाय सम्पदम्॥ १४.७४ ॥

स्वदिव्यदेहप्रकृतीरिवापराः
पराश्च देवीरवृणीत पञ्च सः।
यथार्हसेवावसरे प्रमाद्यतां
यदन्वितः सन्नभिगम्यतां ययौ॥ १४.७५ ॥

अखण्डिताशोक्तिभिरेकवृत्तितः
स ताभिरन्योन्यसमन्वितात्मभिः।
विभूषयामास विभूतिवैभवं
दिशाभिरष्टाभिरिवात्मनः पदम्॥ १४.७६ ॥

अवाप्य देव्यः पतिमग्र्यनायकं
महौजसं मन्मथसूत्रसंयताः।
उदग्रसद्वंशभुवो मिथः समाः
सुवृत्तमुक्तावलि सौम्यतां ययुः॥ १४.७७ ॥

आदौ लक्ष्मीरभजत हरिं रुक्मिणीरूपदृश्या
प्रापुस्तस्याः प्रतिनिधिपदं तत्प्रियाः सप्त देव्यः।
सिद्धीरष्टौ दधदिव तदा सेवितस्ताभिरेकः
क्रीडायोगी निरवधिमसौ निर्वृतिं निर्विवेश॥ १४.७८ ॥

प्राचीनासु प्रकृतिषु यथा प्रादुरासन् प्रजौघाः
तद्वज्जाताः सममिव जगन्नेतुरष्टासु तासु।
पश्चात्प्राप्तप्रणयिनि तथा षोडशस्त्रीसहस्त्रे
तेषामेकः किमयमथवा तत्समानो बभूव॥ १४.७९ ॥

शमितनिगमखेदैः साधुभिः श्लाघनीयं
चरितमिदमुदारं तस्य चाणूरहन्तुः।
श्रुतमनुकथितं वा शुद्धिमग्र्यां दधानं
समतनुत पृथिव्यां शाश्वतं धर्मसेतुम्॥ १४.८० ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
चतुर्दशः सर्गः ॥